श्री गरुड कवचं

श्री गरुड कवचं

अस्य श्री गरुड कवच स्तोत्रमंत्रस्य नारद ऋषिः वैनतेयो देवता अनुष्टुप् छंदः मम श्री वैनतेय प्रीत्यर्थे जपे विनियोगः |

शिरो मे गरुडः पातु ललाटं विनतासुतः |
नेत्रे तु सर्पहा पातु कर्णौ पातु सुरार्चितः || 1 ||

नासिकां पातु सर्पारिः वदनं विष्णुवाहनः |
सूर्यसूतानुजः कंठं भुजौ पातु महाबलः || 2 ||

हस्तौ खगेश्वरः पातु कराग्रे तरुणाकृतिः |
नखान् नखायुधः पातु कक्षौ मुक्तिफलप्रदः || 3 ||

स्तनौ मे विहगः पातु हृदयं पातु सर्पहा |
नाभिं पातु महातेजाः कटिं पातु सुधाहरः || 4 ||

ऊरू पातु महावीरः जानुनी चंडविक्रमः |
जंघे दंडायुधः पातु गुल्फौ विष्णुरधः सदा || 5 ||

सुपर्णः पातु मे पादौ तार्क्ष्यः पादांगुली तथा |
रोमकूपानि मे वीरो त्वचं पातु भयापहा || 6 ||

इत्येवं कवचं दिव्यं पापघ्नं सर्वकामदं |
यः पठेत् प्रातरुत्थाय विषदोषं प्रणश्यति || 7 ||

त्रिसंध्यं यः पठेन्नित्यं बंधनात् मुच्यते नरः |
द्वादशाहं पठेद्यस्तु मुच्यते शत्रुबंधनात् || 8 ||

एकवारं पठेद्यस्तु मुच्यते सर्वकिल्बिषैः |
वज्रपंजरनामेदं कवचं बंधमोचनं || 9 ||

इति श्रीनारदगरुडसंवादे श्री गरुड कवचं ||